# ॥ શ્રીલલિતાપુષ્પાઞ્જલિસ્તોત્રમ્ ॥

.. shrIlalitApuShpA njalistotram ..

sanskritdocuments.org

August 20, 2017

# .. shrIlalitApuShpA njalistotram ..

# ॥ શ્રીલલિતાપુષ્પાઞ્જલિસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : lalitApuShpAnjalistotram

File name : lalitApuShpAnjalistotram.itx

Category : devii, dashamahAvidyA, lalita

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Sanjay Khandelwal ksanjay209 at yahoo.co.in

Proofread by : Sanjay Khandelwal, NA, PSA Easwaran

Latest update : February 13, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીલલિતાપુષ્પાઞ્જલિસ્તોત્રમ્ ॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીલલિતાત્રિપુરસુન્દર્યૈ નમઃ ॥

ૐ સમસ્તમુનિયક્ષકિમ્પુરુષસિદ્ધવિદ્યાધર-
ગ્રહાસુરસુરાપ્સરોગણમુખૈર્ગણૈઃ સેવિતે! ।
નિવૃત્તિતિલકામ્બરાપ્રકૃતિશાન્તિવિદ્યાકલા-
કલાપમધુરાકૃતે કલિત એષ પુષ્પાઞ્જલિઃ ॥ ૧॥

ત્રિવેદકૃતવિગ્રહે, ત્રિવિધકૃત્યસન્ધાયિનિ,
ત્રિરૂપસમવાયિનિ ત્રિપુરમાર્ગસઞ્ચારિણિ! ।
ત્રિલોચનકુટુમ્બિનિ ત્રિગુણસંવિદુદ્યુત્પદે
ત્રયિ, ત્રિપુરસુન્દરિ, ત્રિજગદીશિ! પુષ્પાઞ્જલિઃ ॥ ૨॥

પુરન્દરજલાધિપાન્તકકુબેરરક્ષોહર-
પ્રભઞ્જનધનઞ્જયપ્રભૃતિવન્દનાનન્દિતે! ।
પ્રવાલપદપીઠીકાનિકટનિત્યવર્તિસ્વભૂ-
વિરિઞ્ચિવિહિતસ્તુતે! વિહિત એષ પુષ્પાઞ્જલિઃ ॥ ૩॥

યદાનતિબલાદહઙ્કૃતિરુદેતિ વિદ્યાવય-
સ્તપોદ્રવિણરૂપસૌરભકવિત્વસંવિન્મયિ! ।
જરામરણજન્મજં ભયમુપૈતિ તસ્યૈ સમા-
ખિલસમીહિતપ્રસવભૂમિ! તુભ્યં નમઃ ॥ ૪॥

નિરાવરણસંવિદુદ્ભ્રમપરાસ્તભેદોલ્લસત્-
પરાત્પરચિદેકતાવરશરીરિણિ, સ્વૈરિણિ! ।
રસાયનતરઙ્ગિણીરુચિતરઙ્ગસઞ્ચારિણિ!,
પ્રકામપરિપૂરિણિ! પ્રકૃત એષ પુષ્પાઞ્જલિઃ ॥ ૫॥

તરઙ્ગયતિ સમ્પદં તદનુસંહરત્યાપદં
સુખં વિતરતિ શ્રિયં પરિચિનોતિ હન્તિ દ્વિષઃ ।
ક્ષિણોતિ દુરિતાનિ યત્ પ્રણતિરમ્બ! તસ્યૈ સદા
શિવઙ્કરિ!  શિવે પદે, શિવપુરન્ધ્રિ તુભ્યં નમઃ ॥ ૬॥

શિવે, શિવસુશીતલામૃતતરઙ્ગગન્ધોલ્લસ-

નવાવરણદેવતે!, નવનવામૃતસ્પન્દિની! ।
ગુરુક્રમપુરસ્કૃતે! ગુણશરીરનિત્યોજ્જ્વલે!
ષડઙ્ગપરિવારિતે! કલિત એષ પુષ્પાઞ્જલિઃ ॥ ૭॥

ત્વમેવ જનની પિતા ત્વમથ બન્ધવસ્ત્વં સખા
ત્વમાયુરપરા ત્વમાભરણમાત્મનસ્ત્વં કલાઃ ।
ત્વમેવ વપુષઃ સ્થિતિસ્ત્વમખિલા યતિસ્ત્વં ગુરુઃ
પ્રસીદ પરમેશ્વરિ! પ્રણતપાત્રિ, તુભ્યં નમઃ ॥ ૮॥

કઞ્જાસનાદિસુરવૃન્દલસત્કિરીટકોટિપ્રઘર્ષણસમુજ્જ્વલદઙ્ઘ્રિપીઠે ।
ત્વામેવ યામિ શરણં વિગતાન્યભાવં દીનં વિલોકય યદાર્દ્રવિલોકનેન ॥ ૯॥

Encoded by Sanjay Khandelwal ksanjay209 at yahoo.co.in
Proofread by Sanjay Kandelwal, NA, PSA Easwaran

.. shrIlalitApuShpA njalistotram ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*